हिमसंस्कृतवार्ताः
दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-5 ■ वर्ष-4 ■ अङ्क-116 | 1 | फरवरी 24, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ वसन्त-ऋतुः
सूर्यः उत्तरायणः फाल्गुणः कृष्ण एकादशी
तिथिः फाल्गुणः 13 प्रविष्ठांशः मङ्गलमयः भवेत्

2 अद्भुता मण्डी
ऑस्ट्रेलियायाः ग्रेटरबेण्डिगो नगरनिगमस्य अधिकारिणः सिड्डू व्यञ्जनस्य स्वादनं कृतवन्तः

3 भारतीय-निवासिताः सर्वे जनाः नूतन प्राविधि-क्षेत्रे आर्टिफिशियल इंटेलिजेंस जगत्यां अग्रे एव चलन्ति-मनसः वार्ताः

5 महाशिवरात्रिव्रतं नृणां सर्वमङ्गलकारकम् वांछितार्थप्रदञ्चास्ति

## सुभाषितम्

**नारिकेलसमाकारा,**
**दृश्यन्तेऽपि हि सज्जनाः।**
**अन्ये बदरिकाकारा,**
**बहिरेव मनोहराः॥**

हिन्द्यर्थः- जिस प्रकार नारियल बाहर से कठोर परन्तु अन्दर से कोमल होता है उसी प्रकार सज्जन मनुष्य होते हैं। दुर्जन व्यक्ति बदरिफल (बेर) के समान होते है जो बाहर से मनोहर दिखते है ओर अन्दर से कठोर होते है।

# शतकवीरः विराट कोहली, भारतेन पाकिस्तानदेशं षड् स्तोभैः पराजित्य विजिता चैम्पियन्स ट्रॉफी इत्यस्य लीगस्तरीया प्रतिस्पर्धा

हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा
विराट कोहली पुनरेकबारं पाकिस्तानदलस्य आशानां विनाशं कृत्वा भारतीयदलाय विजयस्य उपहारं दत्तवान्। गतदिने संयुक्त अरब अमीरातस्य दुबई अंताराष्ट्रीय क्रीडांगणे जायमाने चैम्पियन्स ट्रॉफी इत्यस्य द्वंद्वे विराटस्य शतकबलेन भारतेन पाकिस्तानदलं षड् स्तोभैः पराजित्य प्रतिस्पर्धा विजिता। अनेन पाकिस्तानदलस्य अभियानमपि समाप्तम्। टॉसमिति विजित्य पाकिस्तानदलेन प्रथमं फलकक्रीडका चयनिता। भारतीयकन्दुकक्षेपकाणां समक्षं पाकिस्तानस्य क्रीडकाः असहजाः एव आसन्। केवलं सऊद सकीलः अर्धशतकं कृत्वा पाकिस्तानदलस्य धावनांकसंख्यां 200तः अग्रे नीतवान्। तेन सः मोहम्मद रिजवानः 46, खुशदिल शाह 38, बाबर आज़मश्च 23 धावनांकानां योगदानं दत्तवन्तः। भारतस्य कुलदीप यादवः 3, हार्दिक पंड्या 2, रविन्द्र जडेजा, हर्षित राणा, अक्षर पटेलश्च 1-1 धावनांकान् योजितवन्तः। 49.4 कन्दुकचक्रेषु पाकिस्तानस्य सम्पूर्णं दलं 241 धावनांकेषु एव अवरुद्धम्।



242 धावनांकानां लक्ष्यस्य प्राप्तिक्रमे भारतीयक्रीडकः विराट कोहली स्वकीय एकदिवसीयप्रारूपस्य 51तमं शतकं कृत्वा भारताय विजयस्य उपहारं दत्तवान्। तेन 111 कन्दुकेषु अविजितः शतकं (100*) कृतम्। श्रेयस अय्यरः 56, शुभमन गिलः 46, रोहित शर्मा च 20 धावनांकान् योजितवन्तः। भारतेन 42.3 कन्दुकचक्रेषु 4 क्रीडकहानौ 244 धावनांकान् अर्जयित्वा इयं विजयश्रीः प्राप्ता। पाकिस्तानपक्षतः शाहीन शाह अफरीदी 2, अबरार अहमदः, खुशदिल शाह च 1-1 स्तोभं प्राप्तवन्तौ। विराट कोहली एव प्रतिस्पर्धायाः सर्वश्रेष्ठः क्रीडकः अपि चयनितः। भारतस्य अनेन विजयेन चैम्पियन्स ट्रॉफी 2025 इत्यस्यां पाकिस्तानदलस्य अभियानं समाप्तम्। यतोहि पाकिस्तानदलेन स्वकीययोः द्वयोः प्रतिस्पर्धयोः पराजय एव प्राप्तः। अधुना पाकिस्तानदलाय मात्र औपचारिकता एव अवशिष्टा। तद्विपरीतं भारतेन स्वकीये उभे प्रतिस्पर्धे विजिते। भारतं स्वसमूहे प्रथमस्थाने विद्यते पाकिस्तानश्च अन्तिमे। भारतस्य अग्रिमा प्रतिस्पर्धा न्यूज़ीलैंडदेशेन सह मार्च मासस्य द्वितीये दिनांके भविष्यति।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## बागेश्वर-धाम-चिकित्सा एवं विज्ञान-अनुसन्धान-संस्थानस्य आधारशिलां संस्थापितवान् प्रधानमन्त्री नरेन्द्रमोदी

हिमसंस्कृतवार्ताः। प्रधानमन्त्री नरेन्द्र मोदी मध्यप्रदेश-बिहार-असम प्रदेशानां त्रिदिवसीय यात्रोपक्रमे मध्य प्रदेशस्य छतरपुर क्षेत्रं सम्प्राप्तवान्। अन्तावधौ सः छतरपुरजनपदे बागेश्वर-धाम-चिकित्सा एवं विज्ञान-अनुसन्धान-संस्थानस्य आधारशिलां संस्थापितवान्। अत्याधुनिक यन्त्रै सुसज्जितेऽस्मिन् कर्क चिकित्सालये निर्धन-कर्करोगिणां निःशुल्क चिकित्सा भविष्यति। प्रधानमन्त्री नरेन्द्र मोदी अकथयत् यत् सर्वेषां कृते स्वास्थ्यं "तेषां सर्वकारस्य"" सब का साथ, सबका विकास" इत्येतस्य संकल्पस्य मुख्यस्तम्भः वर्तते। गतमध्याहे मध्यप्रदेशस्य छतरपुरजनपदे आधारशिलां संस्थापयन् श्रीमोदी प्रोक्तवान् यत् इदं संस्थानं वंचित-कर्क रोगिभ्यः निःशुल्क चिकित्सां प्रापयिष्यति। कर्करोगमालक्ष्य सर्वकारस्य प्रयासान् प्रकटीकुर्वता तेन विज्ञापितं यत् आयत्ययके कर्करोगस्य दूरीकरणार्थं बत्वः घोषणाः कृताः। प्रधानमन्त्री भोपाले दिनद्वयात्मकस्य वैश्विक-निवेशक-शिखर सम्मेलनस्यापि उद्घाटनं विधास्यति।



प्रधानमन्त्री अद्य बिहारस्य भागलपुरक्षेत्रे प्रयास्यति, यन्तसः प्रधानमन्त्री-किसान-योजनायाः एकोनविंशतितमां देयराशिमपि प्रकाशयिष्यति। अनेन माध्यमेन अशेषे हि देशे सप्तति-लक्षाधिक-नवकोटि परिमिताः कृषकाः पञ्चशतकोट्यधिक-एकविंशतिसहस्त्र-रूप्यकाणां वित्तीयसहायतां प्राप्स्यन्ति। श्रीमोदी बिहारराज्ये विभिन्न-विकास-परियोजनानां उद्घाटनं लोकार्पणञ्च करिष्यति। अतः परं प्रधानमन्त्री नरेन्द्रमोदी झुमोर-बिनन्दिनी-कार्यक्रमे भागग्रहणार्थं गुवाहाटीं प्रति गमिष्यति।

## तेलंगानायां सुरंग-विध्वन्स-दुर्घटनायां अष्ट-श्रमिकाः निष्कासिताः

तेलंगानायां नागरकुरनूल क्षेत्रे सुरंग-विध्वन्स-दुर्घटनायां अष्ट-श्रमिकाः सैन्यसहायेन निष्कासितः। आपदुद्धरणकार्याणि सजवगत्या जायमानानि सन्ति। राष्ट्रीय एवं राज्य-आपत्प्रबन्धनदलं गतदिनादेव घटनास्थले उपस्थितो विद्यते।

## दिल्ल्याः विधानसभायाः प्रथम-सत्रम् अद्य

दिल्ल्याः नव-रचित-विधानसभायाः प्रथम-सत्रम् अद्यप्रभति प्रारप्स्यति। सत्रस्य प्रथम-दिवसे नूतन-निर्वाचित-विधायकाः शपथविधिं अङ्गीकरिष्यति तदनन्तरं विधानसभा अध्यक्षस्य निर्वाचनं भविष्यति। द्वितीय-दिवसे उप-राज्यपालः विनय कुमार सक्सेना सदनं संबोधयिष्यति। विगत-प्रशासनस्य कार्य चर्चा संबद्ध-विविध-विवरण-माध्यमेन प्रस्तोष्यति।

## दयानन्द सरस्वती महाभागस्य जयन्त्यवसरे राष्ट्रपतिः श्रद्धाञ्जलिः समर्पितवती

राष्ट्रपति-पदासीना द्रौपदी मुर्मुः स्वामी दयानन्द सरस्वती महाभागस्य जयन्त्यवसरे तस्मै श्रद्धाञ्जलि समर्पितवती। एकस्मिन् सामाजिकान्तर्जालिक-सन्देशे तया प्रोदीरितं यत् स्वामि दयानन्दस्य शिक्षा एवं सामाजिक-परिष्कार-कार्यक्रमैण समाजे सकारात्मक परिवर्तनार्थं महती भूमिका समाविष्कृता। राष्ट्रपतिः प्रोक्तवती यत् स्वामी दयानन्दः भारतीय-पुनर्जागरणस्य प्रमुख-स्तम्भ वर्तते। तया अभीप्सितं यत् प्रत्येक नागरिकः देशस्य प्राचीन-गौरवं प्रतिष्ठापयितुं स्वामी-दयानन्द-सरस्वती-महाभागस्य विचारैः प्रेरणां स्वीकृत्य विकसित राष्ट्रस्य निर्माणदिशि अग्रे वर्धेत।

# वैदेशिका अतिथयः अवदन्, अद्भुता मण्डी ऑस्ट्रेलियायाः ग्रेटरबेण्डिगो नगरनिगमस्य अधिकारिणः सिड्डू व्यञ्जनस्य स्वादनं कृतवन्तः



**हिमसंस्कृतवार्ताः - मण्डी।** मण्डी अद्भुतम् अस्ति (Mandi is Amazing) एतानि वचनानि आस्ट्रेलियादेशस्य ग्रेटर बेण्डिगो नगरनिगमस्य अधिकारिभिः मण्डीनगरस्य सौन्दर्यं दृष्ट्वा उक्तम्। ऑस्ट्रेलियादेशस्य ग्रेटरबेण्डिगोनगरनिगमस्य अधिकारिणः सम्प्रति मण्डीनगरे सन्ति। ऑस्ट्रेलियादेशस्य महापौर एते च अधिकारिणः शनिवासरे नगरनिगममण्डीं गत्वा तत्रत्यानां व्यञ्जनानां स्वादनं कृतवन्तः। अस्मिन् समये नगरनिगमस्य मण्ड्याः महापौरः, पार्षदाः, अन्ये कर्मचारिणः च उपस्थिताः आसन्। नगरनिगमद्वयेन विभिन्नयोजनासु दीर्घविमर्शः कृतः तथा च निर्णयः कृतः यत् ते नगरविकाससम्बद्धानां आह्वानानां निवारणाय संयुक्तप्रयत्नाः करिष्यन्ति, परस्परं प्रौद्योगिकीनां पद्धतीनां च सहभागितां करिष्यन्ति।

## पर्वतीयवर्णैः चित्रिताः अतिथयः

विदेशीयाः अतिथयः पर्वतीयवर्णैः चित्रिताः दृश्यन्ते स्म। पर्वतीयशिरस्त्राणं, अङ्गवस्त्र, पादांशुकं करांशुकं च धारयन्तः जनानां मध्ये विदेशीयाः अतिथयः आगताः। आस्ट्रेलियादेशस्य विक्की पारेसा, तौसी मॉस्, ब्रोकी शार्प्, अभिषेक अवस्थी च इन्दिरा मार्केट इत्यस्य छदौ स्थापितेषु खाद्यपदार्थेषु सम्यक् आनन्दं प्राप्य प्रशंसाम् अकुर्वन्।

## पुनः आगमिष्यामः मण्डीम्

ऑस्ट्रेलियादेशस्य विक्की परासा, टौसी मॉस, ब्रॉकी शार्प च सिड्डू इत्यस्य बहु आनन्दं प्राप्तवन्तः। अवस्थी इत्यनेन सह सम्भाषणे टंसी मॉस् इत्यनेन उक्तं यत् सिड्डू स्वादिष्टः अस्ति, पुनः मण्डीम् आगमनस्य विषये अपि सः कथयति स्म।

## महापौरः अवदत्-

आस्ट्रेलियादेशस्य ग्रेटर बेण्डिगो नगरनिगमस्य महापौरः अभिषेक अवस्थी इत्यनेन उक्तं यत् शिवरात्रि २०२६ दिनाङ्के आस्ट्रेलियादेशस्य प्रतिनिधिमंडलं मण्डीनगरम् आनयिष्यते येन सम्पूर्णं भारतम् मण्डीनगरस्य सौन्दर्यस्य संस्कृतेः च विषये ज्ञातुं शक्नोति। मण्डीनगर निगमस्य महापौरः वीरेन्द्रभट्ट शर्मा इत्यनेन उक्तं यत् लघ्वीकाशीं प्राप्य विदेशीयानां अतिथिनां स्वागतं कृतम्। विदेशीयाः अतिथयः सेरीमञ्चे परोक्षितव्यञ्जनानां स्वादनं कृत्वा बहु प्रशंसन्ति स्म। आगामिसमये द्वयोः निगमसंस्थाः मिलित्वा कार्यं करिष्यन्ति, यस्याः योजनायाः विषये चर्चा अभवत्।

# Mahakumbh : त्रिवेणीसंगमे विपक्षनेता जयरामठाकुरः धर्मपत्न्याः डॉ. साधनाठाकुर इत्यनया साकं स्नानम् अकरोत्



हिमसंस्कृतवार्ताः । महाकुम्भस्य शुभावसरे प्रयागराजस्य त्रिवेणी संगमे पवित्रस्नानं कृत्वा विपक्षस्य नेता जयरामठाकुरः स्वपत्न्या डॉ. साधनाठाकुर इत्यनया सह प्रार्थनां कृतवान्। सः अवदत् यत् गंगामातुः अङ्के आगत्य मनः शान्तिं, सन्तुष्टिं, ऊर्जां च प्राप्नोति। एषः आश्चर्यजनकः भावः अस्ति। सः मोक्षदात्रीं गङ्गामातरं प्रार्थय सर्वेषां मानवजातीनां सुखसमृद्धि कल्याणं च याचितवान्।

# Himachal News: आन्ध्रप्रदेशे हिमाचलप्रदेशसचिवालयस्य दलेन केरलं ४-१ इति अंकैः पराजितम्

**हिमसंस्कृतवार्ताः - शिमला।** आन्ध्रप्रदेशे आयोजितायां अखिलभारतीय-सिविलसेवा-हाकी-प्रतियोगितायां हिमाचलप्रदेशसचिवालयदलेन केरलं ४-१ इति अंकैः पराजितम्। हिमाचलसचिवालयस्य कृते बनेशकुमारः २ गोलानि, रविशङ्करः एकं गोलं, हेमन्तकुमारः एकं गोलं च कृतवान् । अनेन केरलप्रदेशः चत्वारि-एकम् इति अंकैः पराजितः।

# Bilaspur News : विस्थापितनगरस्य बिलासपुरस्य प्रत्येकं पाकशाला PNG इत्यनेन सह सम्बद्धा भविष्यति

हिमसंस्कृतवार्ताः - बिलासपुरम्। भाखड़ाविस्थापितानां नगरस्य बिलासपुरस्य जनानां पाकशाला अधुन पीएनजी (पाइप्ड् प्राकृतिकवायुः) इत्यनेन प्रज्वलितं भविष्यति। ऊनातः परं बिलासपुरं राज्यस्य द्वितीयं मण्डलं भविष्यति। खाद्यनागरिक- आपूर्तिः उपभोक्तृकार्याणि च विभागेन भारतपेट्रोलियमेन सह योजनायाः कार्यान्वयनार्थं सहमतिः कृता अस्ति। विद्युत्बिलवत् प्रतिमासं गैसबिलम् अपि उत्पद्यते यस्य कृते स्मार्टमीटर् स्थापनं भविष्यति। योजनायाः कार्यान्वयनानन्तरं जनानां कृते घरेलुवायुः क्षीणः जातः ततः परं अनिलकोशस्य प्रतीक्षां न कर्तव्या भविष्यति। औपचारिकतानां सम्पन्नीकरणस्य प्रक्रिया प्रचलति, सम्बन्धितविभागात् एनओसी कृते पत्रं लिखितम् अस्ति। एनओसी प्राप्तस्य अनन्तरं प्रस्तावः अनुमोदनार्थं जिलादण्डाधिकारिणः समीपं प्रेषितः भविष्यति।

ऊना-पश्चात् बिलासपुर-नगरस्य, एम्स-इत्यस्य च प्रत्येकं गृहं प्रति पाइपलाइन-माध्यमेन पाकशालासु प्रत्यक्षतया घरेलु-गैसस्य आपूर्तिः भविष्यति । बिलासपुरनगरस्य एम्सस्य च समीपे डीसीयू-संयंत्राणि स्थापितानि भविष्यन्ति, येषां स्थानानि विभागेन चिह्नितानि सन्ति। खाद्य-नागरिक-आपूर्ति-एवं+उपभोक्ताकार्य-विभागस्य बिलासपुरस्य जिलानियंत्रकः बृजेन्द्रः पठानिया इत्यस्यानुसारं एम्स इत्यत्र तथा बिलासपुरनगरे डीसीयू संयंत्र स्थापनायै भूमेः चयनं कृतम् अस्ति। एतयोः स्थानयोः ३०० वर्गमीटर् व्यासस्य डीसीयू संयंत्राणि स्थापितानि भविष्यन्ति। पीएनजी-गैसः एलपीजी-गैसस्य अपेक्षया बहु न्यूनमूल्येन भविष्यति ।

## शीघ्रं शाहतलाईक्षेत्रे सुविधा

**बाबा बालकनाथस्य तपस्यास्थले शाहतलाई इत्यत्र एतां योजनां कार्यान्वितुं निर्णयः कृतः, स्थानं चिह्नितम् अस्ति। चयनितस्थाने डीसीयू संयंत्र स्थापितं भविष्यति।**

# अटलचिकित्सा विश्वविद्यालयः डॉ. देवीचन्द मेमोरियल ओरेशनकार्यक्रमस्य आयोजनं करिष्यति

**हिमसंस्कृतवार्ताः डॉ.पद्मनाभः नेरचौक, मण्डी।** डॉ. देवीचन्द- मेमोरियल- ओरेशन- कार्यक्रमः अस्य वर्षस्य अटल- मेडिकल- अनुसन्धान- विश्वविद्यालये नेरचौके सम्पादयिष्यते। एतदर्थं डॉ. देवीचन्द- मेमोरियल- ट्रस्टेन विश्वविद्यालयप्रबन्धनात् आग्रहः कृतः, यं विश्वविद्यालयः स्वीकारितवान्। पूर्वं एषः कार्यक्रमः आईजीएमसी-शिमलायाम् आयोजितः अभवत्।

अस्मिन् कार्यक्रमे देशस्य सुविख्यात- चिकित्साविशेषज्ञाः आमन्त्र्यन्ते, ते च चिकित्साक्षेत्रे सम्पन्नेषु अनुसन्धानेषु विषयेऽपि सूचनां ददाति। अयं कार्यक्रमः चिकित्साविज्ञानक्षेत्रे कार्यरतान् अध्ययनशीलान् च जनानाम् अति विशेषः अस्ति। अत्र, अटल- मेडिकल- अनुसन्धान- विश्वविद्यालयस्य कुलपति डॉ. सुरेन्द्रकश्यपः उक्तवान् यत् डॉ. देवीचन्द- मेमोरियलट्रस्टेन अस्य ओरेशनस्य विश्वविद्यालयेन सम्पादनस्य प्रस्तावः दत्तः, यःप्रबन्धनेन स्वीकृतः।

## कः आसीत् डॉ. देवीचन्दः?

स्वर्गीयः डॉ. देवीचन्दः देशस्य विख्यातः चिकित्सकः आसीत्। सः देशस्य प्रथमप्रधानमन्त्रिणः स्वर्गीय- पण्डित जवाहरलालनेहरोः व्यक्तिगतचिकित्सकः अपि आसीत्। सः आईजीएमसी, अर्थात् तस्मिन् समये स्नोडन-चिकित्सालयस्य एस. एस. अपि आसीत्। तस्य परिवारः तस्य निधनानन्तरं तस्य नाम्ना मेमोरियलट्रस्टं संस्थापितवान्। अद्य तस्य तृतीया पीढ़ी एतस्य ट्रस्टस्य सञ्चालनं कुर्वन्ति।

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

# 'बोधकथा'

## 'मनुष्यस्य मूल्यम्'

एकस्मिन् दिने गौतम बुद्धस्य प्रियशिष्यः अपृच्छत्- मनुष्यजीवनस्य मूल्यं कियत्? बुद्धः शिष्याय एकं दीप्तिमानं पाषाणं दत्वा अवदत्- अस्य पाषाणस्य मूल्यं कियत्? इति ज्ञात्वा प्रत्यागच्छतु किन्तु पाषाणस्य विक्रयणं मा करोतु इति।

शिष्यः प्रथमं बीजपूरफलस्य विक्रेता समीपं गत्वा पाषाणस्य मूल्यम् अपृच्छत्- तदा विक्रेता शिष्यं द्वादशानि बीजपूरफलानि दत्वा- इयत् पाषाणस्य मूल्यं इति कथितः। अनन्तरं सः आलुकस्य विक्रेतां समीपं गत्वा- पाषाणस्य स्थाने कति आलुकानि मिलति? इति अपृच्छत्- तदा विक्रेता तं एका गोणी पूरितम् आलुकानि अददत्। अग्रे गत्वा शिष्यः स्वर्णकारस्य समीपं गत्वा तम् अपि पाषाणं दर्शयित्वा तस्य मूल्यम् अपृच्छत्- तदा स्वर्णकारेण पञ्चाशत् लक्षम् रुप्यकाणि झटिति दत्वा मां पाषाणं विक्रेयतु इति सूचनां कृता। शिष्यः इदम् अस्वीकृतवान् तदा स्वर्णकारः तं द्वे कोटि रुप्यकाणि दातुं सिद्धः किन्तु शिष्य तम् अस्वीकृत्य अग्रे गत्वा रत्नाकरस्य समीपं गतः। पाषाणं तस्मै अदर्शयत् तदा रत्नकारेण प्रथमं रक्तवर्णीय वस्त्रं प्रसृतं, तस्योपरि च पाषाणं स्थापयित्वा, तस्य प्रदक्षिणा कृता। तत् पाषाणं बहुमूल्यं माणिक्यम् आसीत्। अनन्तरं पृष्टम्- एतादृशं बहुमूल्यं रत्नं कुतः प्राप्तम्? अस्य राज्यस्य विक्रयेण अपि रत्नस्य मूल्यं कर्तुम् असमर्थः। आश्चर्यचकितः शिष्यः स्वगुरोः समीपम् प्रत्यागत्य गुरुं सर्वं कथितवान्।


बुद्धः तम् उक्तवान्- पुरतः स्थितः जनः स्वस्य ज्ञानेन, स्वस्थित्यनुसारम् अवगमनेन च भवतां मूल्यं करिष्यति।-

# भारतीय-निवासिताः सर्वे जनाः नूतन प्राविधि-क्षेत्रे आर्टिफिशियल इंटेलिजेंस जगत्यां अग्रे एव चलन्ति-मनसः वार्ताः



प्रधानममिन्त्रणा नरेन्द्रमोदिनोक्तं यत् आर्टिफिशियल इंटेलिजेंस-क्षेत्रे भारत-देशः द्रुतगत्या स्वीय अभिज्ञानं सुदृढी करोति। आकाशवाणीतःगतदिने मन की बात इत्यस्मिन् कार्यक्रमे श्री मोदिनोक्तं यत् भारतीय-निवासिताः सर्वे जनाः नूतन प्राविधि-क्षेत्रे आर्टिफिशियल इंटेलिजेंस जगत्यां अग्रे एव चलन्ति । असौ पेरिस नगर्यां ए. आई. अर्थात् आर्टिफिशियल इंटेलिजेंस-उपवेशने भागं ग्रहणावसरे वदति स्म। प्रधानमन्त्रिणोक्तं यत् यूनां सहभागिता-कारणात् अन्तरिक्ष- आर्टिफिशियल इंटेलिजेंस-सदृश-विभिन्न-क्षेत्रेषु नूतन क्रान्ति समायाता अस्ति। तेन गर्वं-अनुभूय अभिव्यक्तं यत् भारत-देशेन गत-मासे इसरो-माध्यमेन स्वकीय अन्तरिक्ष यानं प्रक्षेपितम्। तेन भणितं यत् एतेन स्पष्टमस्ति यत् राष्ट्रं प्रतिदिनं अंतरिक्ष-विज्ञाने नूतन-उपलब्धयः प्रापयति। प्रधानमन्त्रिणा अंतरिक्ष-वैज्ञानिकानां दलं नारीणां सहभागित्वमपि प्रशंसितम् । राष्ट्रिय-विज्ञान-दिवसः अस्मिन् मासे अष्टाविंशति-तारिकायां आमानितः। तेन मार्च अष्टम दिने अन्ताराष्ट्रिय-महिला-दिवस-परिपालन-विषये ऽपि चर्चा प्रकटितः। तेन भणितं यत् अवसरोऽयं नारी-शक्तिं नमन-करणस्य विशिष्ट-अवसरो विद्यते। प्रधानमन्त्रिणा प्रतिपादितं यत् हंसा मेहता वर्येण स्वीय राष्ट्रिय-ध्वज-निर्माणात् तं प्रति हुतात्मभूताभ्यः महिलाभ्यः योगदानमपि अस्माकं समक्षं उपस्थापितम् आसीत्। प्रधानमन्त्रिणा घोषणा एका विहिता यत् महिला दिवसोपलक्ष्ये असौ एकं पदक्षेपं विधास्यति, यं नारी-शक्तिं विषये पूर्णतया समर्पिता भविष्यति। प्रधानमन्त्रिणा उत्तराखण्डे राष्ट्रीय-क्रीडासु जनानां सहभागिता चर्चिता । तेनोक्तं यत् आयोजनेऽस्मिन् देवभूम्यां नूतन स्वरूपं प्रस्तुतम्। श्रीमोदिना प्रोक्तं यत् सर्वाधिक-स्वर्ण-पदक-विजेतुं-सैन्य-दलं भूरि-प्रशंसितम्। तेन भणितं यत् अस्मदीय बहवः क्रीडकाः 'खेलो इंडिया' इति अभियानस्य योगदानं अस्ति।

प्रधानमन्त्रिणा भणितं यत् अधुना प्रत्येकस्मिन् अष्टमेषु जनेषु एकः स्थूल-कायायाः कारणात् चिन्तितो वर्तते। चिन्तास्पदं वर्तते यत् बालकेरूपि स्थूलतन-समस्या द्विगुणी भूता जाता। तेनोक्तं यत् जनाः स्वकीय-भोजन-चर्यायां परिवर्तनं विधाय आलस्य-मुक्ताः भवितुं शक्नुवन्ति । मन- की बात- इति कार्यक्रमे प्रधानमन्त्रिणा स्थूल जनानां विषये ओलम्पिक पदक विजेता-नीरज-चौपड़ा- मुष्ठी- क्रीडिका निखत जरीन- प्रख्यात चिकित्सक देवी शेट्टी एतेषां संदेशाः अपि सर्वश्रवण-गोचरी कृताः। डॉ. देवी शेट्टी वर्यया प्रोक्तं यत् स्थूल-मनुष्यः सर्वेषु कार्येषु आलस्यपूर्णेन करोति, एतां समस्यां अपाकरणस्य आवश्यकता विद्यते। प्रधानमन्त्रिणा भारतस्य जीवंत-वनस्पति जीव-जन्तूनां उल्लेखः अपि कृतः। तेनोक्तं यत् एशियाई सिंहः, हंगुल-पिग्मी हॉग-लॉयन- टेल्ड मैकाक-विश्वे कुत्रापि न प्राप्यन्ते। तेन वन्य जीवन-संरक्षण-सम्बद्ध-कार्येषु सक्रिय भूमिकां निर्वहणार्थं देशीय जनजातीय जनान् प्रति आभारः प्रकटितः। प्रधानमन्त्रिणा भणितं यत् कर्नाटके बी. आर. टी. बाघ-अभ्यारण्ये-बाघानां संख्या द्रुतगत्या वर्धयति। श्रीमोदिना अंडमान निकोबार द्वीप समूहे 'डियर-वुमन' नामधेया अनुराधा-रावस्य उल्लेखः अपि कृतः। अनुराधा रावेन गत त्रिषु दशकेषु मृग-मयूराणां रक्षार्थं अभियानमेकं प्रचालितम्। प्रधानन्त्रिणा परीक्षां भागं ग्रहीतुं तत्परेभ्यः छात्रेभ्यः शुभकामना संदेशः अपि प्रसारितः।





किरण सुमन, शिक्षिका
मीमांसा-संस्कृत-अकादमी

## महर्षिदयानन्दाष्टकम्

### (अनुष्टुप् छन्दसि)

गुर्जरे जन्म संपन्नः, सत्यव्रतो दृढोऽभवत्।
शैशवे मृत्युभीतः सन्, त्यक्तवान् गृहमेव सः॥१॥
सर्वं मिथ्या निरीक्ष्यैव, मोक्षमार्गं विचिन्तयत्।
त्यक्त्वा सर्वं ययौ दूरं, वेदमार्गे स्थितोऽभवत्॥२॥
शास्त्राण्यस्य हृदि स्थित्वा, वेदज्ञानं ददौ मुदा।
धर्मस्यास्य प्रचाराय, स देशं भ्रमतेऽनिशम्॥३॥
सत्यार्थप्रकाशकर्ता, मूढध्वान्तं विनाशयन्।
सर्वान् शिक्षां ददौ नित्यं, लोकबोधं विधाय सः॥४॥
बालविवाहं निन्दित्वा, मूर्तिपूजां च वारयन्।
स्त्रीशिक्षां च प्रवर्तयन्, धर्ममार्गप्रकाशकः॥५॥
आर्यसमाजं संस्थाप्य, वेदधर्मप्रबोधकः।
देशस्यास्य कृते नित्यं, तेजोमयः सदा स्थितः॥६॥
विषदुष्टान् निहत्यैव, निर्मलं तस्य जीवनम्।
शुद्धात्मा वेदविद्वांश्च, तेजस्वी सदा स्थितः॥७॥
दयानन्दोऽयमाकीर्तिः, मुक्तो दुर्गतिसङ्कटात्।
यशः शाश्वतमान्प्राप्य, तेजोमयः सदा स्थितः॥८॥
॥ इति महर्षिदयानन्दाष्टकम् ॥

# मनोगतम् सर्वाधिकम्
## लोकप्रियम्- जयरामठाकुरः



हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।

विपक्षस्य नेता जयरामठाकुरः अवदत् यत् 'मनोगतम्' विश्वस्य सर्वाधिकं लोकप्रियं कार्यक्रमम् अस्ति। यस्य कृते देशे सर्वत्र जनाः उत्सुकतापूर्वकं प्रतीक्षन्ते। अयं कार्यक्रमः देशवासिनां मध्ये प्रेरणाम् सृजति। 'मन की बात' इत्यस्य अस्मिन् प्रकरणे प्रधानमन्त्री नरेन्द्रमोदी युनां कृते सन्देशं दत्तवान् यत् भारतेन प्रत्येकस्मिन् क्षेत्रे अग्रणी भवितुं विचारः करणीयः।

जयरामठाकुरः अवदत् यत् अन्तरिक्षतः डीप-टेक् तथा एआइ यावत् अस्माकं युनः विज्ञानं विषयरूपेण न अपितु मिशनरूपेण द्रष्टव्यम्। भारतं यथा विज्ञानक्षेत्रे प्रगतिशीलं वर्तते, तत् स्पष्टं भवति यत् आगामिनी शताब्दी अस्माकं एव अस्ति। इस्रो इत्यनेन स्वस्य शततमं मिशनं प्रारब्धम् । एषा केवलं संख्या एव नास्ति, आगामिषु काले भारतस्य अन्तरिक्षे दीर्घ-उत्प्लवस्य महत्त्वपूर्णं सोपानम् अस्ति । भारतेन, समये समये, अन्तरिक्षसंशोधनस्य ऐतिहासिकसफलता प्राप्ता अस्ति;

जयरामठाकुरः अवदत् यत् एषः वार्तालापः आशायाः सकारात्मकतायाः च संवादः अस्ति यः भारतस्य सामूहिकशक्तिं प्रतिबिम्बयति। शोधसंस्थानां भ्रमणं कृत्वा विज्ञानाय एकं दिवसं समर्पयितुं प्रधानमन्त्री मोदी इत्यस्य आह्वानं अस्माकं राष्ट्रियचरित्रे नवीनतां प्रवर्तयितुं एकं सोपानम् अस्ति। परीक्षाविषये चर्चा देशस्य एकः अद्वितीयः उपक्रमः अस्ति यः अस्माकं युनां परीक्षाणां अवसादात् मुक्तिं कर्तुं अत्यन्तं प्रभावी सिद्धः अभवत्। अस्य कृते अहं प्रधानमन्त्रिणं नरेन्द्रमोदिनं धन्यवादं ददामि। अस्मिन् वर्षे 'मन की बात' इत्यस्य संस्करणं परीक्षाभ्यः परं गत्वा छात्राणां स्वास्थ्यं, प्रौद्योगिकी, एआइ, समग्रविकासं च केन्द्रितम् आसीत् ।

जयरामठाकुरः अवदत् यत् प्रधानमन्त्रिणः एषः सन्देशः अस्माकं परीक्षायोद्धानां मध्ये विश्वासं जनयिष्यति, अवसादमुक्तं, निर्भयचित्तं सुनिश्चितं करिष्यति। भारतस्य वर्धमानस्य क्रीडाप्रतिभायाः विषये अपि प्रधानमन्त्री उक्तवान् । प्रधानमन्त्री केवलं वार्तालापं न करोति, सः कार्यं करोति। खेलो इण्डिया इत्यस्य माध्यमेन सः देशे नूतनायाः क्रीडासंस्कृतेः विकासं कृतवान् । येन न केवलं क्रीडकानां पदकक्षुधा वर्धिता अपितु सफलतायाः आत्मविश्वासः अपि पूरितः। क्रीडा अपि शरीरं स्वस्थं करोति । जयरामठाकुरः अवदत् यत् प्रधानमन्त्रिणा फिटनेस इति राष्ट्रियबलेन सह सम्बद्धः। स्वस्थं मनः स्वस्थशरीरे निवसति। तस्य आह्वानस्य अनुसरणं कृत्वा अस्माभिः स्थूलताविरुद्धं युद्धं एतादृशं आन्दोलनं करणीयम् यस्मिन् लघुपदानि स्वस्थभारतस्य निर्माणं कर्तुं शक्नुवन्ति। स्वास्थ्यं मानवजीवनस्य बहुमूल्या सम्पत्तिः अस्ति । एतेन सह तस्य सामाजिकमाध्यमानां महिलाशक्तेः समर्पणस्य निर्णयः प्रशंसनीयः अस्ति, एतत् महिलासशक्तिकरणस्य यथार्थं उदाहरणम् अस्ति

हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्

# *सामान्यज्ञानम्*



प्रश्नः1. कोचीन- अंतरराष्ट्रीय विमानपत्तनम् कुत्र अस्ति?
उत्तरम् : कोचीन (केरलराज्ये)।
प्रश्नः 2. 'काव्यानुशासनः' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'हेमचन्द्रः'।
प्रश्नः 3. ' गुणस्य योग्यम्' इत्यस्य समस्त पदं किम्?
उत्तरम्- "अनुगुणम्' (अव्ययीभावः)
प्रश्नः 4. 'कुसुमाकरः' इत्यस्य सन्धि- विच्छेदं कुरुत-
उत्तरम्- 'कुसुम + आकरः'।
प्रश्नः 5. राष्ट्रीय- क्रीडा- दिवसः कदा भवति?
उत्तरम् – अगस्तमासस्य नवविंशतिः दिनांके।

# असमराज्ये संस्कृतस्थितिः

असमराज्यान्तर्गता उत्तरप्रान्तीया संस्कृतभारतीसमितिः संस्कृतस्य उज्जीवनाय नवयोजना, प्रशिक्षणम् इत्यादिविविधैः माध्यमैः कार्यकर्तॄन् प्रेरयति। समितिरियं प्रतिवर्षं संस्कृतस्य अध्येतृभिः विद्यार्थिभिः सह संस्कृतानुरागिणः जनान् अधिकतया आक्रष्टुं संस्कृतसम्भाषणशिबिरं, भाषाबोधनवर्गः, इत्यादीनाम् आयोजनम् कुर्वती अस्ति। प्रतिवर्षमेव संस्कृतसम्भाषणशिबिरे भागं गृहीत्वा संस्कृतभाषया वार्तालापं कर्तुं सक्षमान् जनान् प्रशिक्षणशिबिरमाध्यमेन प्रशिक्षितान् विधाय, एवं कार्यकर्तॄन् निर्मातुं तेभ्यः प्रशिक्षणं दीयते। तदनन्तरं प्रशिक्षितानां कार्यकर्तॄणां कार्यदक्षतां, कौशलं च इतोऽपि वर्धनाय अभ्यासवर्गस्य आयोजनं क्रियते। संस्कृतभारती काञ्चित् सर्वजनस्पर्शयोजनां हस्ते गृहीत्वा प्रत्यक्षरूपेण अनवरतं कार्यं कुर्वती अस्ति। यथा-

## १) सम्भाषणशिबिरम्-

सम्भाषणशिबिरं हि संस्कृतभारत्याः मुख्यं कार्यम्। अस्मिन् शिबिरे दशदिनानां यावत्, प्रतिदिनं होराद्वयात्मकस्य संस्कृतकथोपकथनस्य तथ्यपूर्णा शिक्षा अनुरागिभ्यः अत्यन्तं सरलरीत्या दीयते। संस्कृतभाषामाध्यमेन हि प्रवर्तमाने शिबिरेऽस्मिन् संस्कृतगीतं, कथा, मेलनं, नाटकम् इत्यादीनां परिवेशनं क्रियते। तस्मात् ते प्रशिक्षार्थिनः शीघ्रमेव संस्कृतेन वार्तालापं कर्तुं सक्षमाः भवन्ति।

## २) गीता-शिक्षणकेन्द्रम्-

सर्वस्तरीयाणां जनानां मध्ये येषु श्रीमद्भगवद्गीतायाः उपरि गभीरश्रद्धा विद्यते, एवं ये गीताध्ययनं कर्तुमिच्छेयुः तेभ्यः अस्य केन्द्रस्य माध्यमेन सहजसरलभाषया रचितेन गीतापाठ्यक्रममाध्यमेन च शिक्षां प्रदातुं व्यवस्था कृता वर्तते, अनया संस्कृतभारत्या। अयं पाठ्यक्रमः चतुर्षु स्तरेषु विभाजितः अस्ति। प्रत्येकं स्तरे गीताश्लोकः, व्याख्या, व्याकरणज्ञानं, भाषायाः स्वायत्तीकरणम् इत्यादिकं सुलभं कृतं वर्तते, भाषानुरागिणां कृते। तदनुकूलीयः पाठ्यक्रमोऽपि निर्धारितः वर्तते।

## ३) सरलाकेन्द्रम्-

माध्यमिकविद्यालयेषु अध्ययनरतानां छात्राणां सहज- सरल-आकर्षकयुतेन पाठ्यक्रममाध्यमेन संस्कृतं प्रति तान् आग्रहिणः विधातुम् अस्य केन्द्रस्य व्यवस्था विहिता अस्ति। षष्ठकक्षातः नवमकक्षापर्यन्तं चतुःस्तरीयस्य पाठ्यक्रमस्य व्यवस्था अस्ति। ते पाठ्यक्रमाः - सरला, सुगमा, सुखदा, सरसा चेति।

## ४) बालकेन्द्रम्-

अस्मिन् केन्द्रे सप्तवर्षतः द्वादशवर्षपर्यन्तमिति आयुष्मद्भ्यः बालेभ्यः संस्कृतेन क्रीडा, गीतं, श्लोकशिक्षणम् इत्यादिमाध्यमेन भारतीयसंस्कृतेः परिचयः दीयते। सप्ताहे दिनैकं, दिनद्वयं यावत् वा अस्य केन्द्रस्य माध्यमेन तेभ्यः संस्कारशिक्षापि प्रदीयते।

## ५) साप्ताहिकमेलनम्-

साप्ताहिकमेलनं नाम सम्भाषणशिबिरस्य पश्चात् अनुवर्तिकार्यक्रमः इति। अस्मिन् कार्यक्रमे सप्ताहाभ्यन्तरे एकस्मिन् निर्दिष्टे दिने, समये, स्थाने च सम्मिल्य संस्कृतभाषया एकहोरात्मकं चर्चाकार्यं विधीयते।

## ६) पत्राचारः एवं संस्कृतम्-

एतद्योजनानुसारं संस्कृतम् अध्येतुम् इच्छुकानां जनानां कृते आदौ पत्रालयमाध्यमेन पञ्जीकरणं विधाय पाठ्यक्रमस्य संग्रहव्यवस्था कृता अस्ति। स्वगृहे एव स्थित्वा ते संस्कृतस्य अध्ययनं कर्तुं शक्नुयुः।



सा व्यवस्था हि 'पत्राचारद्वारा संस्कृतम्' इत्यस्ति। पाठ्यक्रमोऽयम् असमीया, हिन्दी, आङ्ग्लं, बाङ्ग्ला इत्यादिभिः विविधैः भाषामाध्यमैः पठनव्यवस्था कृता वर्तते। पञ्जीकृतानां शिक्षार्थिनां सम्पूर्णपाठ्यक्रमः द्विवार्षिकः वर्तते। प्रत्येकं षाण्मासिके पाठ्यक्रमे क्रमशः प्रवेशः, परिचयः, शिक्षा, कोविदः चेति चतुर्षु स्तरेषु शिक्षाप्रदानस्य व्यवस्था, एवं परीक्षाव्यवस्था विहिता अस्ति। अनया व्यवस्थया संस्कृतानुरागिणः उपकृताः सन्तः योग्यताप्रमाणपत्रमपि लभन्ते। अनेन प्रकारेण पाठ्यक्रमान् पूर्णतः सम्पाद्य कोऽपि जनः रामायणं, महाभारतं, भागवतं, भगवद्गीता इत्यादीन् ग्रन्थान् संस्कृतेन एव पठित्वा सम्यक्तया अवगन्तुं सक्षमः भवति। षोडशोर्ध्वाः सर्वेऽपि एनं पाठ्यक्रमं स्वीकर्तुं शक्नुयुः।

## ७) संस्कृतगृहम्-

यस्मिन् गृहे प्रत्येकं गृहसदस्यैः संस्कृतेन भाषितुं शक्यते, तादृशं गृहमेव 'संस्कृतगृहम्' इत्युच्यते। उत्तरासमप्रान्ते इतः पर्यन्तं ४४ सङ्ख्यकानि तादृशानि गृहाणि उपलभ्यन्ते, यत्र च गृहसदस्याः परस्परं संस्कृतेन एव भाषन्ते। यदि कोऽपि जनः स्वगृहं संस्कृतगृहं कर्तुम् इच्छति, तस्मै संस्कृतभारती सर्वतोभावेन साहाय्यं प्रददाति। आगच्छन्तु, वयं सर्वे मिलित्वा २०२५-२६ तमे वर्षाभ्यन्तरे शतशः संस्कृतगृहाणि कुर्याम। संस्कृतभाषायाः अविरतरूपेण प्रचारकार्यस्य मध्ये संस्कृतभारती २००५ तमे ख्रिष्टाब्दे विश्वैतिह्यरूपे माजुलीक्षेत्रे १५००-मितसङ्ख्यकाधिकानां शिशूनां समावेषणेन ऐतिहासिकरूपेण शिशुसंस्कारजन्यं शिबिरं सुसम्पन्नं कृतवती। एवमेव २००९-तमे ख्रिष्टाब्दे महापुरुषस्य श्रीश्रीमाधवदेवस्य 'नारायणपुर लेतेकुपुखुरी' इति नामधेये जन्मस्थाने तादृशः हि शिशुसंस्कारसमारोहः दृष्टिमोदजन्यरूपेण सुसम्पन्नः अभवत्। संस्कृतभारती संस्कृतभाषायाः इतोऽपि प्रचारप्रसारणार्थं संस्कृतदिवसः, गीताजयन्ती, कालिदासजयन्ती, संस्कृतसम्बद्धं विज्ञानप्रदर्शनं, सम्भाषणसन्देशः, ग्राहकनिर्माणजन्यम् अभियानं, भारतीपूजा, सान्ध्यकेन्द्रं, संस्कृतसप्ताहचरणं, शोभायात्रा इत्यादिकार्यैः सह विविधकालेषु अन्येषां संस्थासंघटनप्रतिष्ठानादीनां सहयोगेन संस्कृतसम्बद्धान् विभिन्नकार्यक्रमान् समाचरन्ती अस्ति। संस्कृतभारती विविधैः कर्मयोजनामाध्यमैः संस्कृतमातरं प्रति सेवारता वर्तते। न केवलं भारतवर्षे एव, अपि तु २६-सङ्ख्यकेषु देशेषु संस्कृतभारत्याः सम्प्रति कार्यपरिचालना प्रवर्तमाना अस्ति। विश्वेतिहासः स्पष्टतया, असकृत् च स्वीकृतवान् अस्ति यत् भारतस्य ज्ञानविज्ञानयोः नेतृत्वं महत्, 'नासा' इत्येका प्रकृष्टा विज्ञानसंस्था देनन्दिकं विज्ञानतत्त्वम् अनुसृत्य परीक्षानिरीक्षादिकं कुर्वती अस्ति। संस्कृतं भूलोके सर्वोत्कृष्टा, युक्तिपूर्णा च भाषा अस्ति, यस्याः सम्पर्कः मानवमात्रस्य हृदयस्पन्दनेन सह विराजते इति नासया प्रतिपादितं वर्तते। अद्यतनः प्रजन्मः उत्तरपुरुषाणां सत्यान्वेषणस्य मार्गम् उद्घाटयेत्। सत्यसंस्कारतः एव संस्कृतं, संस्कृतिः च समुत्पन्ने स्तः। अतः संस्कृतं शाश्वतम्। आगच्छन्तु, यद्यपि वयं राष्ट्रप्रेमजन्यम् अन्यत्कार्यं कर्तुमनर्हाः, तथापि संस्कृतभाषायाः प्रचार-प्रसारकार्यार्थम् उत्सर्गिताः सन्तः संस्कृतजनन्याः सेवामाध्यमेन भारतजनन्याः सेवां कुर्याम इति।

# "रैबार पहाड़ का" इत्यन्तर्गत कांस्यपदक विजेत्री शिवानी देवरानी सम्मानिता अभवत्




वार्ताहरः- कुलदीपमैन्दोला। कोटद्वार।

उत्तराखण्डस्य सुपुत्री शिवानी देवरानी, या अष्टत्रिंशत् (38) राष्ट्रियक्रीडायाम् नेटबॉल्स्पर्धायाम् कांस्यपदकम् प्राप्तवती, "रैबार पहाड़ का" इत्यन्तर्गतं समारोहेण भव्यतया सम्मानिता अभवत्। देहरादूने सम्पन्ने अष्टत्रिंशत् राष्ट्रियक्रीडायाः नेटबॉल्स्पर्धायां कांस्यपदकं प्राप्तवत्याः कोटद्वारनिवासिन्याः, पौड़ीजनपदस्य विकासखण्ड-रिखणीखाल-निवासिन्याः "शिवानीदेवरानी" इत्यस्याः हल्दुखता-निवासे सम्मानसमारोहः आयोजितः अभवत्।

## शिवानी देवरानी विशेषसन्मानं प्राप्तवती

अस्य समारोहस्य मुख्यातिथिः "पीसीएस" इति अधिकारी शैलेन्द्रसिंहनेगी तथा विशिष्टातिथिः रघुबीरबिष्टः इत्येतौ उपस्थितौ आस्ताम्। ते शिवानीं सम्मानवस्त्रं समर्प्य, प्रशस्तिपत्रं च स्मृतिचिह्नं च प्रदाय सम्मानितवन्तौ। शैलेन्द्रनेगी महोदयः अवदत् – "बालिकाः सर्वेषु क्षेत्रेषु प्रवर्तनीयाः। आत्मनिर्भरत्वं च प्राप्तव्यम्।"

विशिष्टातिथिः बिष्टमहोदयः अवदत् –"शिवानी देवरानी अष्टत्रिंशत् राष्ट्रियक्रीडायाम् उत्कृष्टं प्रदर्शनं कृत्वा कांस्यपदकं प्राप्तवती। अस्याः स्वर्णिमं भविष्यं भविष्यति। सा नूनं स्वर्णपदकं प्राप्तुं समर्था भविष्यति।"

### शिवान्याः सफलता-कथा

कोटद्वारनिवासिनी शिवानी देवरानी बहुपरिश्रमं कृत्वा एतां सिद्धिं प्राप्तवती। नेटबॉल्स्पर्धायां उत्तराखण्ड-तेलंगाणाराज्ययोः संघर्षः 42-42 इति समतलः जातः, तस्मात् उभे अपि दले संयुक्ततः कांस्यपदकेन सम्मानिते अभवताम्।

### नेतृणां क्रीडाप्रेमिणां च प्रतिक्रियाः

मुख्यातिथिना उक्तम् –

"उत्तराखण्डस्य बालिकाः सर्वेषु क्षेत्रेषु उत्तमं कार्यं कुर्वन्ति। शिवान्याः सिद्धिः अन्याभ्यः प्रेरणादायिका भविष्यति। राज्यस्य क्रीडाविकासार्थं सर्वथा सहाय्यं प्रदास्यामः।"

### शिवानी स्वयं अवदत् –

"एतस्य पदकस्य प्राप्तौ मम परिवारस्य, प्रशिक्षकस्य, मम दलस्य च महत् योगदानं अस्ति। अहं भविष्ये अपि उत्तमं प्रदर्शनं कृत्वा देशस्य प्रदेशस्य च नाम प्रसिद्धं कर्तुं दृढसंकल्पिता अस्मि।"

## भविष्य-योजनाः

शिवानी अद्य आगामिनि राष्ट्रीय-अंतरराष्ट्रीय स्पर्धायाः सिद्धतां कुर्वती अस्ति। सा उत्तराखण्डे नेटबॉल् क्रीडायाः प्रसारं च विकासं च कर्तुं दृढसंकल्पित।

**"रैबार पहाड़ का" – इत्यस्य "अभिनन्दनसमारोहः"**

एषः सम्मान-समारोहः चन्द्रमोहनजदलीमहोदयस्य सौजन्येन आयोजितः। एषः प्रयासः उत्तराखण्डे क्रीडायाः प्रति जागरूकतां वर्धयितुं महत्वपूर्णः अभवत्। अस्मिन् अवसरे श्री योगम्बरसिंहरावतः, गिरिराजसिंहरावतः, पार्षदः मनीषनैथानी, जगदीशप्रसादबहुखण्डी, सुनीलथपलियालः, प्रधानाचार्य रमाकान्तकुकरेती, आचार्यः कुलदीपमैंदोला, जगदीशप्रसाददेवरानी, बीरेंद्रखनसूली, सुनीलघिल्डियालः, हेमंतध्यानी, नितिनदेवरानी, ग्रामवासिनः मातृशक्तिः, युवा वर्गः च उपस्थितः आसीत्। एतत् सम्मानं केवलं शिवान्यै न, अपितु सम्पूर्णस्य उत्तराखण्डाय गौरवप्रदः अभवत्। "रैबार पहाड़ का" इत्यनेन सफलायोजनेन समस्त जनानां हृदये विशेषस्थानं प्राप्तम्।

# महाशिवरात्रिव्रतम्

हिमसंस्कृतवार्ताः शिवराजभट्टः, नेपालम्



प्रतिसम्वतसरे फाल्गुनमासे कृष्णपक्षे शिवरात्रिदिने हिन्दुधर्मालम्बीनजनानां भक्तानां शिवालयेषु जनसम्मर्दः भवति । अस्मिन् दिने भारतस्य रीवामण्डले महामृत्युञ्जय शिवालयधामे, उज्जैननगरे महाकालेश्वर शिवालयधामे, मंडीमण्डले भूतनाथशिवालयधामे ,जूनागढ़े शिवालयधामे,तमिलनाडुराज्ये रामेश्वरधामे, जम्मूमण्डले शिवखोरीधामे, ऋषिकेशे नीलकंठे तथा नेपालस्य काठमाण्डौमण्डले पशुपतिधामे, अछामस्य बैद्यनाथधामे, देवघाटे, एवं प्रकारेण भुटानदेशे, बाङ्लादेशे, बर्मादेशे स्थितेषु बहुषु शिवालयेषु मेलापकाः भवन्ति । अस्मिन् चतुर्दशीदिने भक्तजनाः एकदिवसीयं शिवरात्रिव्रतं कृत्वा भगवन्तं शिवं गीतैर्वाद्यैस्तथा नृत्यैर्भक्तिभावसमन्वितः चतुर्यामेषु प्रतियामे धूपैर्दीपैश्च नैवेद्यैः स्तोत्रपाठैर्जपादिभिः पूजार्चनं कुर्वन्ति प्रार्थयन्ति च । महाशिवरात्रिव्रतं नृणां सर्वमङ्गलकारकम् वांछितार्थप्रदञ्चास्ति तस्मात् महाशिवरात्रिव्रतस्य प्रभावेण भक्तानाम् गृहे सर्वदुःखैकनाशनं सुखं, शान्तिः, समृद्धिः च प्राप्यन्ते, अनुत्तमसर्वैश्वर्यं लभ्यन्ते, सर्वविघ्नविनाशं भुत्वा, यद्यत्प्रार्थयते तत्तत वस्तु प्राप्नुवन्ति सर्वदा इह लोके सुखं भुक्त्वा दृढां शिवभक्तिं प्राप्नुवन्ति, अन्ते च शिवलोकं याते भक्तजनाः इति विश्वासं कुर्वन्ति । शिवशब्दस्य अर्थः कल्याणम् अस्ति तदा शिवरात्रिः कल्याकारीरात्रिः इत्यपि मन्यते । हिन्दुपञ्चाङ्गे द्वादशमासेषु द्वादशः भगवतः शिवस्य प्रियकृष्णचतुर्दश्यः शिवरात्रयः नामभिः प्रसिद्धा सन्ति, परन्तु ताषु फाल्गुनमासस्य कृष्णचतुर्दशी शिवस्य अतिप्रिया तिथिः महाशिवरात्रीति नाम्ना प्रसिद्धा अस्ति । अस्मिन् विषये श्रीशिवमहापुराणे विद्येश्वरसंहितायां नवमोऽध्याये शिवः नंदिकेश्वरं प्रति कथयति **"शिवरात्रिरिति ख्याता तिथिरेषा मम प्रिया"** अपरमेकं कथनम् अपि अस्ति **"चतुर्दश्यां तु कृष्णायां फाल्गुने शिवपूजनम् । तामुपोष्य प्रयत्नेन विषयान् परिवर्जयेत ।"** अस्मिन् महोत्सवविषये बहुनि पुराणानि बहुनि आख्यानानि सन्ति । सृष्टेः आरम्भे फाल्गुनमासे कृष्णपक्षे चतुर्दशीदिने मध्यरात्रौ भगवान् शङ्करः ब्रह्मणः रुद्ररूपेण अवतीर्णः बभूव । रुतं शब्दस्य अर्थं दुःखं, द्रावयति नाशयति अर्थात दुःखंनाशयति इति रुद्रः । अयम् उत्सवः हिन्दुधर्मे प्रसिद्धासु चतसृषु रात्रिषु मध्ये एका अस्ति । भगवतः कृष्णस्य जन्मदिवसे भाद्रकृष्णाष्टम्याम् पुराकाले भगवता कृष्णेन सर्वान् रक्षकान् मोहयित्वा गोकुलं गतवान् तस्मात् मोहरात्रीति नाम्ना प्रसिद्धा अस्ति ।



आश्विनशुक्लसप्तम्यां अर्थात नवरात्रिपर्वणि सप्तम्यां तिथौ देवीं कालरात्रीं पूजयन्ति तस्मात् कारणात् कालरात्रीति नाम्ना प्रसिद्धा अस्ति । कार्तिकमासे अमावस्यायां सुखसमृद्ध्यर्थं लक्ष्मीं पूजयन्ति तस्मात् सुखरात्रीति नाम्ना प्रसिद्धा अस्ति । चतसृषु पवित्रासु रात्रिषु मध्ये एका शिवरात्रिः भगवतः शिवस्य आशुतोषस्य दिवसः अस्ति इति अपि पुराणेषु वर्णितः अस्ति । अस्मिन्दिने भक्तजनाः स्वगृहे शिवालये वा गत्वा निर्जलाव्रतम्, रात्रौजागरणम्, चतुर्यामेषु पूजनं, शिवलिङ्गे दुग्धाभिषेकं, शिवमहिमायाः गायनं, शिवसहस्रनामादि स्त्रोत्रपाठं, मन्त्र जपमित्यादिकं कार्यं कुर्वन्ति । बहुषु पुराणेषु शिवपूजनस्य विषये बहवः विधयः वर्णिताः सन्ति, परन्तु भगवन् शिवः केवलः शुद्धजलैः, विल्वपत्रै, लतापुष्पादिभिः च प्रसन्नः भवति बहव्यः पूजनसामग्र्यः आवश्यकाः न इति भक्तजनाः विश्वासं कुर्वन्ति । **" न स्नानेन न वस्त्रेण न धूपेन न चार्चया । तुष्यामि न तथा पुष्पैर्यथा तत्रोपवासतः।।"** इत्यपि वर्णनमस्ति। महाशिवरात्रिः उत्सवः बहूनाम् उत्सवानां राजा इति कथ्यते, शिवरात्रि-उत्सवः जीवने आनन्दं जीवनान्ते च मोक्षम् आनयति इति जनाः मन्यन्ते। यदि कोऽपि आसम्वत्सरपर्यन्तं शिवपूजार्चनं कर्तुं समर्थः न भवति तर्हि महाशिवरात्रीदिने पूजार्चनं कृत्वा सम्पूर्णसंवत्सरस्य शुभफलं प्राप्नोति इति विश्वासम् अस्ति । प्रलयकाले अस्मिन् दिने भगवन् शिवः तृतीयेन नेत्रेण विश्वविनाशं करिष्यति इति पुराणेषु उल्लेखः अस्ति । श्रीगरुडपुराणे पूर्वखण्डे प्रथमांशाख्ये आचारकाण्डे चतुर्विंशत्युत्तरशततमोऽध्याये महाशिवरात्रिव्रते अस्मिन्विषये **"माघफाल्गुनयोर्मध्ये कृष्णा या तु चतुर्दशी । तस्यां जागरणाद्रुद्रः पूजितो भुक्तिमुक्तिदः ॥"** इत्यादि वर्णनमस्ति। शिवरात्रि व्रतविषये अग्निपुराणे द्विनवत्यधिकशततमोऽध्याये **"माघफाल्गुनयोर्मध्ये कृष्णा या तु चतुर्दशी । कामयुक्ता तु सोपोष्या कुर्वन् जागरणं व्रती । शिवरात्रिव्रतं कुर्वे चतुर्दश्यामभोजनं"** वर्णनमस्तिश्रीमद्नारदपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थभागे त्रयोविंशत्यधिकशततमोऽध्याये द्वादशमासस्थितचतुर्दशीव्रतवर्णनं प्रसंगे पृथक-पृथक चतुर्दशी व्रतस्य पृथक पृथक वर्णनमस्ति । अन्त्ये महाशिवरात्रि विषये **"अंत्यकृष्णचतुर्दश्यां शिवरात्रिव्रतं द्विज । निर्जलं समुपोष्यात्र दिवानक्तं प्रपूजयेत् ।।"** इति कथनमस्ति । स्कन्दपुराणे व्रतविषये **"सागरो यदि शुष्येत क्षीयेत हिमवानपि । मेरुमन्दरशैलाश्च रीशैलो विन्ध्य एव च ।। चलन्त्येते कदाचिद्वै निश्चलं हि शिवव्रतम्।। "** इति वर्णनमस्ति। अयं दिवसः भगवतः शिवस्य पार्वतीदेव्याः सह पुनर्मिलनरूपेण अपि प्रसिद्धः अस्ति । पुराकाले भगवन् शिवः हिमालयस्य पुत्रीं पार्वतीं सार्धं फाल्गुनमासे कृष्णपक्षे चतुर्दशे दिने विवाहं चकार तस्मादपि महाशिवरात्रिदिवसस्य महन्महत्त्वं वर्तते । अधुनापि यदि कस्यापि विवाहे विविधा बाधाः सन्ति येनकेनापि कारणेन विवाहकार्ये विलम्बं भवति तदा चेत् सः भक्तिभावेण शिवरात्रिव्रतं करोति तदा व्रतप्रभावेण सर्वाः बाधाः विनिर्मुक्तो भूत्वा शीघ्रमेव विवाहः भवति इति भक्तजनाः मन्यन्ते । महाशिवरात्र्याः दिवसे भगवन् शिवः लिङ्गरूपेण प्रादुर्बभुव । तस्मिन् समये ब्रह्माः विष्णुः च प्रथमं लिङ्ग रूपेण शिवस्य पूजार्चनं स्तुतिञ्च चक्रतुः । अतः एव महाशिवरात्र्याः दिने शिवलिङ्गस्य विशेषरूपेण पूजनं भवति । यदा वासुकिम् मथनं योक्त्रं कृत्वा तथा मन्थानं मन्दरं कृत्वा उदधिं मेथुः । तदा भगवन् विष्णु स्वयं कुर्मरुपं समास्थाय मन्दरञ्च दध्रे । मथनतः प्राप्तः कालकुट विषात् रक्षाणार्थाय देवाः शिवं स्तुतिम् चक्रुः । भगवन् विष्णुः भगवन्तं शिवं समुद्रमन्थात् निर्गतः हालाहालविषं ग्रहणार्थं ददौ । ततः भगवन् शिवः तं विषममृतवत् स्वकण्ठे धृत्वा कैलासम् जगाम सृष्टिं सङ्कटात् ररक्ष । भगवतः शिवस्य कण्ठेनीलवर्णं बभूव भगवन् शिवः नीलकण्ठः इति अपि उच्यते इति वर्णनमस्ति । महाशिवरात्रौ पशुपतिनाथं षोडशोपाचारैः वेदघोषपूर्वकं पूजनं कुर्वन्ति । रात्रौ प्रथमयामे मोक्ष प्राप्तर्थं सायङ्काले शिवलिङ्गे पुजार्चनं कृत्वा दुग्धाभिषेकं जलाभिषेकञ्च कुर्वन्ति । द्वितीययामे रात्रौ धन समृद्धि प्राप्त्यर्थं शिवलिङ्गे पूजार्चनं कृत्वा दध्नाभिषेकं जलाभिषेकञ्च कुर्वन्ति । तृतीययामे मध्यरात्रौ शारीरिक रोगव्याधि विनासार्थं शिवलिङ्गे पूजार्जनं कृत्वा आज्याभिषेकं जलाभिषेकञ्च कुर्वन्ति । चतुर्थयामे अर्थात अपरदिने प्रभात समये ब्रह्म मुहुर्ते शिवलिङ्गे पूजार्चनं कृत्वा मधुनाभिषेकं जलाभिषेकं कुर्वन्ति। अस्मिन् दिने, देशदेशात् भक्ताजनाः साधवः, योगिनः, वैरागीनः, संन्यासिनः, नागबाबा इत्यादीनां विभिन्नानां सम्प्रदायानां वेषं धारयतः योगी पशुपतिनाथस्य दर्शनं पूजार्चनं कर्तुं अत्र समागच्छन्ति। महाशिवरात्रौ सायङ्काले दीपप्रज्वलनस्य परम्परा अस्ति । भगवन् शिवः धुनिप्रियः अस्ति इति पौराणिकविश्वास अस्ति, एवं शीतकाले अद्यापि शीतलः न भवेत चिन्तयित्वा , उष्णस्थानात् आगतः भक्तजनाः शीतं मा वाधेत, बहवः जनाः मनोरन्जनार्थं यत्रतत्र शिवधुनेः प्रज्वालनं कुर्वन्ति ।